| अथोपपापातकानि। | प्रायश्चित्तानि। | तदशक्तौ धेनुदानम्। | तदशक्तौ चूर्णादानम्। | दक्षिणा। |
|---|---|---|---|---|
| ब्राह्मणक्षत्रियवैश्यकर्तृकब्राह्मणस्वामिकाज्ञानकृतगवीवधः। | सार्द्धमासिकव्रतम्। तद्यथा। गोष्ठे गोसमीपे गोघ्नः स्थितिं कुर्य्यात्। तत्रैव स्थितो शयनञ्च। शक्तुयावकपयोदधिसरगोमयानां भक्षणं क्रमशः कुर्य्यात्। नखरोमविवर्जितस्त्रिसवनस्नानञ्चरेत्। जितेन्द्रियो वीतमत्सरश्च भवेत्। यथाशक्ति गायत्रीञ्च जपेत्। सार्द्धमासे पूर्णे सति विप्रान् भोजयेत्। गां तन्मूल्यं वा दक्षिणां दद्यात्। अनेन विधानेन गोघ्नः पापान्मुच्येत। एतद्व्रतं गोस्वामिने तज्जातरूपं गवान्तरं यथोक्तमूल्यं वा दत्त्वा कर्त्तव्यम्। स्त्रीशूद्रबालवृद्धानामर्द्धं प्रायश्चित्तम्। | ६ धेनवो भवदेवभट्टसम्मताः। ८ धेनवो बहुसम्मताः। | १८ कार्षापणाः। तन्मूल्यस्वर्णादि वा। २५॥० कार्षापणाः। बहुसम्मताः। सार्द्धाष्टधेनुसङ्कलनात्। | १ गौः। अशक्तौ १ कार्षापणः। स्मार्त्तमते ७॥० कार्षापणाः। |
| अज्ञानकृतशूद्रकर्तृक-ब्राह्मणस्वामिकगवीवधः। | त्रैमासिकव्रतार्द्धम्। अज्ञानतस्तदर्द्धम्। | ६ धेनवो भवदेवभट्टसम्मताः। ८ धेनवो बहुसम्मताः। | १८ कार्षापणाः। २५॥० कार्षापणाः। बहुसम्मताः। तन्मूल्यस्वर्णादि वा। | १ गौः। अशक्तौ १कार्षापणः। |
| अज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकक्षत्रियस्वामिकगवीवधः। | षाण्मासिकव्रतम्। तद्यथा। षाण्मासान् तच्चर्म्मणा परिवृतो गोग्रासाहर्त्ता गोव्रतो यवाशी गाभिरेव सञ्चरन् तत्पापात् विमुच्येत। | १२ धेनवः। | ३६ कार्षापणाः। तन्मूल्यस्वर्णादि वा। | यथाशक्ति। |
| ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतक्षत्रियस्वामिकगवीवधः | षाण्मासिकव्रतार्द्धम्। | ६ धेनवः। | १८ कार्षापणाः। तन्मूल्यस्वर्णादि वा। | यथाशक्ति। |
| शूद्रकर्तृकज्ञानकृत-क्षत्रियस्वामिकगवीवधः। | षाण्मासिकव्रतार्द्धम्। | ६ धेनवः। | १८ कार्षापणाः। तन्मूल्यस्वर्णादिवा | यथाशक्ति। |
| तत्कर्तृकाज्ञानकृततत्स्वामिकगवीवधः। | एतद्व्रतार्द्धम्। स्त्रीशूद्रबालवृद्धानां सर्व्वत्रार्द्धम्। | ३ धेनवः। | ९ कार्षापणाः। तन्मूल्यस्वर्णादि वा | यथाशक्ति। |
| ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवैश्यस्वामिक-गवीवधः। | द्विगुणं मासव्रतम्। मासव्रतं यथा। मासिकं पञ्चगव्यपानं गोष्ठे वासः गवानुगमनं गोमतीजपः। | १० धेनवः। | ३० कार्षापणाः। तन्मूल्यस्वर्णादि वा। | यथाशक्ति। |
| तत्कर्तृकाज्ञानकृततत्स्वामिकगवीवधः। | एतदर्द्धम्। | ५ धेनवः। | १५ कार्षापणाः। तन्मूल्यस्वर्णादि वा | यथाशक्ति। |
| ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतशूद्रस्वामिकगवीवधः। | ४ प्राजापत्यानि। | ४ धेनवः। | १२ कार्षापणाः। तन्मूल्यस्वर्णादि वा। | यथाशक्ति। |
| ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतशूद्रस्वामिकगवीवधः। | २ प्राजापत्ये। स्त्रीशूद्रबालवृद्धानां सर्व्वत्रार्द्धम्। एकस्य स्त्रीत्वशूद्रत्वाद्युभयधर्म्मवत्त्वे प्रायश्चित्तपादः। | २ धेनू। | ६ कार्षापणाः। तन्मूल्यस्वर्णादि वा। | यथाशक्ति। |
| ब्राह्मणस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः। | द्विगुणं त्रैमासिकव्रतम्। अज्ञानतस्तदर्द्धम्। | २४ धेनवो भवदेवभट्टसम्मताः। ३४ धेनवो बहुसम्मताः। | ७२ कार्षापणाः। १०२कार्षापणाः। बहुसम्मताः। | २ वृषौ २० गावः। अशक्तौ ३० कार्षापणाः। |
| ब्राह्मणस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां शूद्रकर्तृकज्ञानकृतवधः | त्रैमासिकव्रतम्। अज्ञानतस्तदर्द्धम्। | १२धेनवः। १७ धेनवो बहुसम्मताः। | ३६ कार्षापणाः। ५१ कार्षापणाः। बहुसम्मताः। | १० वृषः १० गावः। अशक्तौ १५ कार्षापणाः। |